कुम्भलग्नं शुभमाह सत्यो न भागभेदाद् यवना वदन्ति । कस्यांशभेदो न तथास्ति राशेरतिप्रसङ्गस्त्विति विष्णुगुप्तः। यातेष्वसत्स्वसमभेषु दिनेशहोरां ख्यातो महोद्यमबलार्थयुतोऽतितेजाः। चान्द्रीं शुभेषु युजि मार्दवकान्तिसौख्यसौभाग्यधीमधुरवाक्ययुतः प्रजातः। तास्वेव होरास्वपरर्क्षगेषु ज्ञेया नराः पूर्वगुणेषु मध्याः। व्यत्यस्तहोरा भवनस्थितेषु मर्त्या भवन्त्युक्तगुणैर्विहीनाः। कल्याणरूपगुणमात्मसुहृद्दृकाणे चन्द्रोऽन्यगस्तदधिनाथगुणं करोति। व्यालोद्यतायुधचतुश्चरणाण्डजेषु तीक्ष्णोऽतिहिंस्रगुरुतल्परतोऽटनश्च। स्तेनो भोक्ता पण्डिताढ्यो नरेन्द्रः क्लीवः शूरो विष्टिकृद्दासवृत्तिः। पापो हिंस्रोऽभीश्च वर्गोत्तमांशेष्वेषामीशाराशिवद्द्वादशांशैः। जायान्वितो बलविभूषणसत्वयुक्तस्तेजोऽतिसाहसयुतश्च कुजे स्वभागे। रोगी मृतस्वयुवतिर्विषमोऽन्यदारो दुःखी परिच्छदयुतो मलिनोऽर्कपुत्रे। स्वांशे गुरौ धनयशःसुखबुद्धियुक्तास्तेजस्विपूज्यनिरुगुद्यमभोगवन्तः। मेधाकलाकपटकाव्यविवादशिल्पशास्त्रार्थसाहसयुताः शशिजेऽतिमान्याः। स्वे त्रिंशांशे बहुसुतसुखारोग्यभाग्यार्थरूपः, शुक्रे तीक्ष्णः सुललितवपुः सुप्रकीर्णेन्द्रियश्च। शूरस्तब्धौ विषमबधकौ सद्गुणाढ्यौ सुखिज्ञौ चार्वङ्गेष्टौ रविशशियुतेष्वारपूर्वांशकेषु" प्रकीर्णकफलं तत्रैव २३अ० उक्तं यथा

"स्वर्क्षतुङ्गमूलत्रिकोणगाः कण्टकेषु यावन्त आश्रिताः। सर्व एव तेऽन्योन्यकारकाः कर्मगस्तु तेषां विशेषतः। कर्कटोदयगते यथोडुपे स्वोच्चगाः कुजयमार्कसूरयः। कारका निगदिताः परस्परं लग्नगस्य सकलोऽम्बराम्बुगः। स्वत्रिकोणोच्चगो हेतुरन्योन्यं यदि कर्मगः। सुहृत्तद्गुणसम्पन्नः कारकश्चापि स स्मृतः। शुभं वर्गोत्तमे जन्म वेशिस्थाने च सद्ग्रहे। अशून्येषु च केन्द्रेषु कारकाख्यग्रहेषु च। मध्ये वयसः सुखप्रदाः केन्द्रस्था गुरुजन्मलग्नपाः। पृष्ठोभयकोदयर्क्षगास्त्वन्तेऽन्तःप्रथमेषु पाकदाः। दिनकररुधिरौ प्रवेशकाले गुरुभृगुजौ भवनस्य मध्ययातौ। रविसुतशशिनौ विनिर्गमस्थौ शशितनयः फलदस्तु सर्वकालम्"।

स्त्रीजन्मनि विशेषस्तत्रैवोक्तः २४ अ० यथा

"यद्यत्फलं नरभवेऽक्षममङ्गनानान्तत्तद्वदेत् पतिषु वा सकलं विधेयम्। तासां तु भर्तृमरणं निधने वपुस्तु लग्नेन्दुगे सुभगताऽस्तमये पतिश्च। युग्मेषु लग्नशशिनोः प्रकृतिस्थिता स्त्री सच्छीलभूषणयुता शुभदृष्टयोश्च। ओजस्थयोश्च पुरुषाकृतिशीलयुक्ता पापा च पापयुतवीक्षितयोर्गुणोना। कन्यैव दुष्टा व्रजतीह दास्यं साध्वी समा या कुचरित्रयुक्ता। भूम्यात्मज१।८र्क्षे क्रमशोऽंशकेषु वक्रार्किजीवेन्दुजभार्गवाणाम्। दुष्टा पुनर्भूः सगुणा कलाज्ञा ख्याता गुणैश्चासुरपूजितर्क्षे। स्यात् कापटी क्लीवसमा सती च बौधे३।६गुणाढ्या प्रविकीर्णकामा। स्वच्छन्दा पतिघातिनी बहुगुणा शिल्पिन्यसाध्वीन्दुभे४ऽनाचारा कुलटार्कभे५ नृपबधूः पुञ्चेष्टिताऽगम्यगा। जैवे(९।१२)नैकगुणाल्परत्यतिगुणा विज्ञानयुक्ता सती। दासी नीचरतार्किभे(१०।११)पतिरता दुष्टप्रजा स्वांशकैः। शशिलग्नसमायुक्तैः फलं त्रिंशांशकैरिदम्। बलाबलविकल्पेन तयोरुक्तं विचिन्तयेत्। दृक्संस्थावसितसितौ परस्परांशे शौक्रे वा यदि घटराशिसम्भवोऽंशः। स्त्रीभिः स्त्री मदनविषानलं प्रदीप्तं संशान्तिं नयति नराकृतिस्थिताभिः। शून्ये कापुरुषोऽबलेऽस्तभवने सौम्यग्रहावीक्षिते क्लीवोऽस्ते बुधमन्दयोश्चरगृहे नित्यं प्रवासान्वितः। उत्सृष्टा रविणा कुजेन विधवा बाल्येऽस्तराशिस्थिते कन्यैवाशुभवीक्षितेऽर्कतनये द्यूने जरां गच्छति। आग्नेयैर्विधवाऽस्तराशिसहितैर्मिश्रैः पुनर्भूर्भवेत् क्रूरे हीनबलेऽस्तगे स्वपतिना सौम्ये स्थिते प्रोज्झिता। अन्योन्यांशगयोः सितावनिजयोरन्यप्रसक्ताङ्गना द्यूने वा यदि शीतरश्मिसहितौ भर्त्तुस्तदानुज्ञया। सौरारर्क्षे लग्नगे सेन्दुशुक्रे मात्रा सार्द्धं बन्धकी पापदृष्टे। कौजेऽस्तांशे सौरिणा व्याधियोनिश्चारुश्रोणी वल्लभा सद्ग्रहांशे। वृद्धो मूर्खः सूर्यजर्क्षेऽंशके वा स्त्रीलोलः स्यात् क्रोधनश्चावनेये। शौक्रे कान्तोऽतीव सौभाग्ययुक्तो विद्वान् भर्त्ता नैपुणज्ञश्च बौधे। मदनवशगतो मृदुश्च चान्द्रे त्रिदशगुरौ गुणवान् जितेन्द्रियश्च। अतिमृदुरतिकर्मकृच्च सौर्ये भवति गृहेऽस्तमयस्थितेऽंशके वा। ईर्ष्यान्विता सुखपरा शशिशुक्रलग्ने ज्ञेन्द्वोः कलासु निपुणा सुखिता गुणाढ्या। शुक्रज्ञयोस्तु रुचिरा सुभगा कलाज्ञा त्रिष्वप्यनेकवसुसौख्यगुणा शुभेषु। क्रूरेऽष्टमे विधवता निधनेश्वरेऽंशे यस्य स्थितो वयसि तस्य समे प्रदिष्टा। सत्स्वर्थगेषु मरणं स्वयमेव तस्याः कन्यालिगोहरिषु चाल्पसुतत्वमिन्दौ। सौरे मध्यबले बलेन रहितैः शीतांशुशुक्रेन्दुजैः शेषैर्वीर्यसमन्वितैः पुरुषिणी यद्योजराश्युद्गमः। जीवारास्फुजिदैन्दवेषु बलिषु प्राग्लग्नराशौ समे विख्याता भुवि नैकशास्त्र-